# १७. पादुका सहस्रम् - पद्मराग पद्धतिः (३०)

प्रपद्ये रङ्गनाथस्य पादुकां पद्मरागिणीम् ।
पदैक नियतां तस्य पद्मवासा मिवापराम् ॥ १७.१॥ ५८१॥

अतिवाङ्मनसं विचिन्त्य शौरेः पदरक्षे पदपद्म सौकुमार्यम् ।
परिपुष्यसि पद्मरागभासा पदवीमाहित पल्लवामिव त्वम् ॥ १७.२॥ ५८२॥

पदपल्लव सङ्गिभिः प्रदीप्तै रधिकोल्लासिभि रम्ब पद्मरागैः ।
अनले शयनं क्वचिन्मुरारे रविसंवादयसीव पादुके त्वम् ॥ १७.३॥ ५८३॥

विवृणोति रङ्गपति रत्नपादुके
त्वयि पद्मराग मनिपद्धतिः शुभा ।
निबिडोरु सङ्घटन पीडनक्षरन्
मधुकैटभ क्षतज पङ्कवासनाम् ॥ १७.४॥ ५८४॥

प्रतियन्ति रङ्गपति पादुके जनाः
तव पद्मराग मणि रश्मि सन्ततिम् ।
अभिजग्मुषां त्वदनुभाव खण्डितात्
अघसञ्चया द्विगलिता मसृक्छटाम् ॥ १७.५॥ ५८५॥

पश्यन्ति रङ्गेश्वर पादुके त्वां पौराङ्गनाः स्पर्शित रागबन्धाम् ।

शृङ्गारयोने र्ज्वलनस्य दीप्तै रङ्गारजालै रिव पद्मरागैः ॥ १७.६॥ ५८६॥

अवैमि दोषापगमस्य हेतुं तमोपहां सम्भृत पद्मरागाम् ।
अशेषवन्द्यां मणिपादुके त्वां रङ्गेश सूर्योदय पूर्वसन्ध्याम् ॥ १७.७॥ ५८७॥

अवाप्य पादावनि रङ्गभर्तुः पादाम्बुजे पल्लव संस्तराभाम् ।
त्वत्पद्मरागद्युतयो भजन्ते कालानलत्वं कलुषाम्बुधेर्नः ॥ १७.८॥ ५८८॥

निसर्गसिद्धं मणिपादरक्षे देवस्य रङ्गावसथ प्रियस्य ।
बालार्कवर्णाः पदपद्मरागं त्वत्पद्मरागाः पुनरुक्तयन्ति ॥ १७.९॥ ५८९॥

पदेन विश्वं मणिपादरक्षे पत्या समं पालयतो मुरारेः ।
यशःपयोधौ परिकल्पयन्ति प्रवालशोभां तव पद्मरागाः ॥ १७.१०॥ ५९०॥

अर्चिष्मती काञ्चन पादरक्षे प्रस्तौति ते पाटल रत्नपङ्क्तिः ।
रेखा रथाङ्गस्य महःप्रपञ्चं रङ्गेश पादाम्बुज मध्यभाजः ॥ १७.११॥ ५९१॥

त्वयैव पादावनि शोणरत्नै र्बालातपं नून मुदीरयन्त्या ।
पद्मापतेः पादतल प्ररूढं रेखाम्बुजं नित्यमभूदनिद्रम् ॥ १७.१२॥ ५९२॥

नित्यं निजालोकपथं गतानां श्रेयो दिशन्ती श्रितपद्मरागाम् ।
महीयसीं माधव पादरक्षे मन्यामहे मङ्गलदेवतां त्वाम् ॥ १७.१३॥ ५९३॥

देवस्य रङ्ग रसिकस्य विहार हेतोः
आत्मान मङ्घ्रि कमले विनिवेद्य पूर्वम् ।
प्रायो निवेदयसि शोणमणि प्रकाशैः
प्रत्यूष पद्मकलिकां पदरक्षिणि त्वम् ॥ १७.१४॥ ५९४॥

प्रत्यङ्गयस्य हविषः प्रणवेन देवि
प्रक्षेपणाय परमार्थविदां मुनीनाम् ।
प्राज्यां मुकुन्द चरणावनि पद्मरागैः
पर्याय पावक शिखां भवतीं प्रतीमः ॥ १७.१५॥ ५९५॥

सम्पद्यते तव पदावनि पद्मरागैः
प्रस्थान माङ्गलिक होम हुताशनश्रीः ।
क्षीराहुति र्भवति यत्र विकल्प गङ्गा
रङ्गेश्वरस्य रुचिरा नखरश्मि धारा ॥ १७.१६॥ ५९६॥

आमुञ्चता मरुण यावक पङ्कलक्ष्मीं
शोणाश्मनां तव पदावनि कान्ति योगात् ।
पद्मासहाय पदपद्म नखाः श्रयन्ते
सन्ध्यानुरञ्जित सुधाकर बिम्ब शोभाम् ॥ १७.१७॥ ५९७॥

स्थाने तवाच्युत पदावनि पद्मरागाः

तेजोमयाः प्रशमयन्ति तमो मदीयम् ।
चित्रं तदेतदिह यज्जनयन्ति नित्यं
रागात्मकेन महसा रजसो निवृत्तिम् ॥ १७.१८॥ ५९८॥

पद्माकरान्तर विकासिनि रङ्गभर्तुः
पीत्वा पदावनि मधूनि पदारविन्दे ।
शोणोपल द्युतिमयीं सुभग प्रचारां
मन्ये बिभर्षि महतीं मदराग शोभाम् ॥ १७.१९॥ ५९९॥

पादावनि प्रसृमरस्य कलेर्युगस्य
प्रायेण संप्रति निवारयितुं प्रवेशम् ।
श्रीरङ्ग सीम्नि तव शोणमणि प्रसूतः
प्राकार मग्निमय मारभते प्रकाशः ॥ १७.२०॥ ६००॥

लीलागृहान्तर विहारिणि रङ्गनाथे
लाक्षारसै ररुण रत्न मयूख लक्ष्यैः ।
प्रायेण रञ्जयति पाद सरोज युग्मं
सैरन्ध्रिकेव भवती मणिपादरक्षे ॥ १७.२१॥ ६०१॥

रङ्गेशितु र्विहरतो मणिपादरक्षे
रथ्यान्तरे सुमनसः परिकीर्यमाणाः ।
त्वत्पद्मराग किरण च्छुरणाद्भजन्ते

सन्ध्या तपान्तरित तारक पङ्क्ति लक्ष्मीम् ॥ १७.२२॥ ६०२॥

रङ्गाधिराज पदरक्षिणि बिभ्रतस्त्वां
गङ्गातरङ्ग विमले गिरिशस्य मौलौ ।
संवर्धयन्ति महसा तव पद्मरागाः
शैलात्मजा चरण यावक पङ्कलक्ष्मीम् ॥ १७.२३॥ ६०३॥

शरण मुपगतानां शर्वरीं मोहरूपां
शमयितु मुदयस्थान् मन्महे बालसूर्यान् ।
पदसरसिज योगा द्रङ्गनाथस्य भूयः
परिणम दरुणिम्नः पादुके पद्मरागान् ॥ १७.२४॥ ६०४॥

हरिपद रुचिराणां पादुके तावकानां
अरुण मणिगणानां नून मर्धेन्दु मौलिः ।
प्रणति समय लग्नां वासनामेव धत्ते
कलम कणिश कान्ति स्पर्धिनीभि र्जटाभिः ॥ १७.२५॥ ६०५॥

प्रति विहरण मेते पादुके रङ्गभर्तुः
पदकमल सगन्धाः पद्मरागा स्त्वदीयाः ।
तरुण तपन मैत्री मुद्वहद्भि र्मयूखैः
स्थल कमल विभूतिं स्थापयन्त्य व्यवस्थाम् ॥ १७.२६॥ ६०६॥

अयमनितर भोगान् रञ्जयन् वीतरागान्
अरुण मणिगणानां तावकानां प्रकाशः ।
मधुरिपु पदरक्षे मङ्क्षु जाज्वल्यमानः
शलभयति जनानां शाश्वतं पापराशिम् ॥ १७.२७॥ ६०७॥

प्रचुर निगम गन्धाः पादुके रङ्गभर्तुः
पदकमल समृद्धिं प्रत्यहं भावयन्तः ।
दधति शकलयन्तो गाढ मन्तस्तमिस्रं
समुचित मरुणत्वं तावकाः पद्मरागाः ॥ १७.२८॥ ६०८॥

लाक्षा लक्ष्मी मधुर रुचके रङ्गिणः पादरक्षे
वक्त्राम्भोजे मदपरिणतिं पद्मराग द्युतिस्ते ।
कर्णोपान्ते किसलय रुचिं देवि सेवानतानां
सीमन्ते च त्रिदश सुदृशां सौति सिन्धूर शोभाम् ॥ १७.२९॥ ६०९॥

अरुणमणय स्तवैते हरिपद रागेण लब्ध महिमानः ।
गमयन्ति चरणरक्षे द्युमणिगणं ज्योति रिङ्खणताम् ॥ १७.३०॥ ६१०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
पद्मराग पद्धतिः सप्तदशी ॥